# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | RemarkS | By |
|---|---|---|---|
| 1 | 08/03/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 10/03/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 02/09/2012 | **I Proof Reading** | **B S Pavan & H K Srinivasa Rao** |
| | | | |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K sRINIVAsA RAO, N0 26, 2ND FLOOR, 15TH CROss, NEAR VIDHYAPEETA CIRCLE, AsHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: sRKARC6070*

*Email : srkarc@gmail.com*

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# ॥ तन्त्र-सार-सङ्ग्रह ॥

## अध्याय : प्रथमऽध्यायः

ओं ॥ जयत्यब्ज-भवेशेन्द्र-वन्दितः कमळा-पतिः ।

अनन्त-विभवानन्द-शक्ति-ज्ञानादि-सद्गुणः ॥ 01 ॥

विधिं विधाय सर्गादौ तेन पृष्टोऽब्ज-लोचनः ।

आह देवो रमोत्सङ्ग-विलसत्-पाद-पल्लवः ॥ 02 ॥

अहमेकोऽखिल-गुणो वाचकः प्रणवो मम ।

अकाराद्यतिशान्तान्तः सोऽयमष्टाक्षरो मतः ॥ 03 ॥

स विश्व-तैजस-प्राज्ञ-तुरीयात्मान्तरात्मनाम् ।

परमात्मा-ज्ञानात्मा-युजां मद्रूपाणां च वाचकः ॥ 04 ॥

तद्रूप-भेदाः पञ्चाशन्मूर्त्तयो मम चापराः ।

पञ्चाशद्वर्ण-वाच्यास्ता वर्णास्ताराण्ण-भेदिताः ॥ 05 ॥

द्विरष्ट-पञ्चक-चतुष्पञ्चेत्येवाष्ट-वर्ग्ग-गाः ।

अज आनन्द इन्द्रेशावुग्र ऊर्ज ऋतं-भरः ॥ 06 ॥

ॠफल्यौ लेजिरेकात्मा ऐर ओज-भृदौरसः ।
अन्तोऽर्ध्य-गर्भः कपिलः ख-पतिर्ग्गरुडासनः ॥ 07 ॥

घर्म्मो झसारश्चार्वाङ्गश्छन्दो-गम्यो जनार्द्दनः ।
झटितारिर्ञमष्टङ्की ठकलो डरको ढरी ॥ 08 ॥

णात्मा तारस्थभो दण्डी धन्वी नम्यः परः फली ।
बली भगो मनुर्यज्ञो रामो लक्ष्मी-पतिर्वरः ॥ 09 ॥

शान्त-संवित् षड्गुणश्च सारात्मा हंस-ळाळुकौ ।
पञ्चाशन्मूर्त्तयस्त्वेता ममाकारादि-लक्षकाः ॥ 10 ॥

नारायणाष्चाक्षरश्च ताराष्टाक्षर-भेद-वान् ।
आद्यैस्तार-चतुर्वर्ण्णैर्भिन्ना व्याहृतयः क्रमात् ॥ 11 ॥

अनिरुद्धादिकास्तासां देवता व्युत्-क्रमेण वा ।
ताश्चतुर्मूर्त्तयस्त्वेव द्वादशार्ण्ण-पदोदिताः ॥ 12 ॥

नारायणाष्टाक्षराच्च व्याहृतिभ्यस्तथैव च ।
वि-भेदो द्वादशार्ण्णानां केशवाद्याश्च देवताः ॥ 13 ॥

नारायणाष्टाक्षराच्च व्याहृति-त्रि-गुणात् पुनः ।
वेद-माता तु गायत्री द्वि-गुणा द्वादशाक्षरत् ॥ 14 ॥

चतुर्विंशन्मूर्त्तयोऽस्याः कथिता वर्ण्ण-देवताः ।
तद्भेदः पौरुषं सूक्तं वेदाः पुरुष-सूक्त-गाः ॥ 15 ॥

वैदिकाः सर्व-शब्दाश्च तस्मात् सर्वाभिधो ह्यहम् ।
पञ्चाशद्वर्ण्ण-भिन्नाश्च सर्व-शब्दा अतोऽपि च ॥ 16 ॥

ऋषिश्च देवतैकोऽहं तारादीनां विशेषतः ।
छन्दो मदीया गायत्री ताराष्टाक्षरयोर्मता ॥ 17 ॥

उद्यद्-भास्वत्-समाभासश्चिदानन्दैक-देहवान् ।
चक्र-शङ्ख-गदा-पद्म-धरो ध्येयोऽहमीश्वरः ॥ 18 ॥

लक्ष्मी-धराभ्यामा-श्लिष्टः स्व-मूर्ति-गण-मध्यगः ।
ब्रह्म-वायु-शिवाहीश-विपैः शक्रादिकैरपि ॥ 19 ॥

सेव्यमानोऽधिकं भक्त्या नित्य-निश्शेष-शक्तिमान्
मूर्त्तयोऽष्टावभि ध्येयाश्चक्र-शङ्ख-वराभयैः ॥ 20 ॥

युक्ता प्र-दीप-वर्ण्णाश्च सर्वाभरण-भूषिताः ।
तादृग्रूपाश्च पञ्चाशज्ज्ञान-मुद्राभयोद्यताः ॥ 21 ॥

टङ्की दण्डी च धन्वी च तत्तद्-युक्तास्तु वामतः ।
वासुदेवादिकाः शुक्ल-रक्त-पीतासितोज्ज्वलाः ॥ 22 ॥

चक्र-शङ्ख-गदाब्जेतः प्रथमो मुसली हली ।
स-चक्र-शङ्खस्त्वपरस्तृतीयः शार्ङ्ग-बाणवान् ।
स-शङ्ख-चक्रस्तुर्यस्तु चक्र-शङ्खासि-चर्म्मवान् ॥ 23 ॥

केशवो मधु-सूदनः सङ्कर्षण-दामोदरौ ।
स-वासुदेव-प्रद्युम्न दक्षोच्च-कर-शङ्खिनः ॥ 24 ॥

विष्णु-माधवानिरुद्ध-पुरुषोत्तमाधोक्षजाः ।
जनार्द्दनश्च वामोच्च-कर-स्थिता-दरा मताः ॥ 25 ॥

गोविन्दश्च त्रि-विक्रमः स-श्रीधर-हृषीक-पाः ।
नृ-सिंहाश्चाच्युतश्चैव वामधः-कर-शङ्खिनः ॥ 26 ॥

वामनः स-नारायणः पद्म-नाभ उपेन्द्र-कः ।
हरिः कृष्णश्च दक्षाधः-करे शङ्ख-धरा मताः ॥ 27 ॥

शङ्ख-चक्र-गदा-पद्म-धराश्चैते हि सर्वशः ।
क्रम-व्युत्-क्रम पद्मादि-गदादि-व्युत्-क्रमस्तथा ।
अर्ध-क्रमः सान्तरश्च षड्ढु-षट् स्वरि-पूर्विणाम् ॥ 28 ॥

वर्ण्णानां देव-तानां च नित्य-त्वान्न क्रमः सतः ।
व्यक्ति-क्रमं ब्रह्म-बुद्धावपेक्ष्य क्रम उच्यते ॥ 29 ॥

समास-व्यास-योगेन व्याहृतीनां चतुष्टयम् ।
सत्यं चाङ्गानि तारस्य प्रोच्यन्तेऽष्टाक्षरस्य च ॥ 30 ॥

क्रुद्धा-महा-वीर-द्यु-सहस्र-सहितोल्ककाः ।
चतुर्थ्यन्ता हृदादीनी पृथग्रूपाणि तानि च ॥ 31 ॥

विष्णोरेवात्यभेदेऽपि तदैश्वर्यात् तदन्यवत् ।
चक्र-शङ्ख-वराभीति-हस्तान्येतानि सर्वशः ॥ 32 ॥

मूल-रूप-स-वर्ण्णानि कृष्ण-वर्ण्णा शिखोच्यते ।
चतुर्विंशन्मूर्त्तयश्च मूल-रूप-स-वर्ण्णकाः ॥ 33 ॥

आदि-वर्ण्ण-त्रयं नाभि-हृच्छिरस्सु यथा-क्रमम् ।
न्यसनीयं च तद्वर्ण्ण-देवता-घ्यान-पूर्वकम् ॥ 34 ॥

पज्जानु-नाभि-हृदय-वाङ्-नासा-नेत्रा-केषु च ।
अष्टाक्षराणां न्यासः स्याद् व्याहृतीनां प्रजा-पतिः ॥ 35 ॥

मुनिश्छन्दस्तु गायत्री देवता भगवान् हरिः ।
उद्यदादित्य-वर्ण्णश्च ज्ञान-मुद्राभयोद्यतः ॥ 36 ॥

तारेण व्याहृतीभिष्च ज्ञेयान्यङ्गानि पञ्च च ।
नाभि-हृत्-केषु सर्वेषु चतस्रो व्याहृतीर्न्यसेत् ॥ 37 ॥

द्वादशार्ण्णस्य जगती छन्दोऽन्यत् तार-वत् स्मृतम् ।
अच्छ-वर्ण्णोऽभय-वर-करो ध्येयोऽमित-द्युतिः ॥ 38 ॥

पदैर्व्यस्त्यै समस्तैश्च ज्ञेयान्यङ्गानि पञ्च च ।
अष्टाक्षराणां स्थानेषु बाह्वोरूरोश्च विन्यसेत् ॥ 39 ॥

विश्वामित्रस्तु सन्ध्यात्थे तदन्यत्र प्रजा-पतिः ।
मुनिर्द्देवस्तु सवितृ-नामा स्त्रष्टृ-त्वतो हरिः ॥ 40 ॥

प्रोद्यदादित्य-वर्ण्णश्च सूर्य्य-मण्डल-मद्ध्य-गः ।
चक्र-शङ्ख-धरोऽङ्क-स्थ-दोर्द्वयो ध्येय एव च ॥ 41 ॥

सताराश्च व्याहृतयो गायत्र्यङ्गानि पञ्च च ।
दोः पत्सन्धिषु साग्रेषु नाभि-हृन्मुख-केषु च ॥ 42 ॥

वर्ण्ण-न्यासश्च कर्त्तव्यस्तारवन्निखिलं स्मृतम् ।
पञ्चाशदक्षराणां च पुं-सूक्तस्यापि सर्वशः ।
अनु-ष्टुभश्च त्रि-ष्टुप् च च्छन्दोऽस्य त्रि-ष्टुभोऽपि वा ॥ 43 ॥

विष्णु-शब्दश्चतुर्त्थ्यन्तो हृदयेतः षडक्षरः ।
तारवत् सर्वमस्यापि श्यामो ध्येयो हरिः स्वयम् ॥ 44 ॥

वर्ण्णा एव षडङ्गानि ष-णयोर्भेद-योगतः ।
पञ्जानु-नाभि-हृन्नासा-केषु न्यासश्च वर्ण्णशः ॥ 45 ॥

एते तु सर्व-मन्त्राणां मूल-मन्त्रा विशेषतः ।
एतज्-ज्ञानात् समस्तं च ज्ञातं स्याच्छब्द-गोचरम्
एतज्जपात्  समस्तानां मन्त्राणां जापको भवेत् ॥ 46 ॥

पूज्यश्च भगवान् नित्यं चक्राब्जादिक-मण्डले ।
अचले हृदये वाऽपि चले वा केवल-स्थले ।

अष्टाक्षरेण सम्पूज्य प्रथमं देवतां पराम् ।
मद्ध्ये सव्ये गुरूंश्चैव दक्षिणे सर्व-देवताः ॥ 48 ॥

पुनः सव्ये सर्व-गुरूनाग्नेयादिषु च क्रमात् ।
गरुडं व्यास-देवं च दुर्ग्गां चैव सरस्वतीम् ॥ 49 ॥

धर्म्मं ज्ञानं च वैराग्यमैश्वर्यं चैव कोण-गान् ।
तदन्तः पूर्व-दिक्पूर्वमधर्मादींश्च पूजयेत् ॥ 50 ॥

अ-पूजिता अ-धर्मादि-दातारस्ते तथाऽभिधाः ।
निर्ऋतिश्चैव दुर्ग्गा च कामो रुद्रश्च देवताः ॥ 51 ॥

यम-वायु-शिवेन्द्राश्च ज्ञेया धर्म्मादि-देवताः ।
परमः पुरुषो मद्ध्ये शक्तिराधार-रूपिणी ॥ 52 ॥

कूर्म्मोऽनन्तश्च पृथिवी क्षीर-सागर एव च ।
श्वेत-द्वीपो मण्डपश्च दिव्य-रत्न-मयो महान् ॥ 53 ॥

पद्ममेतत्-त्रयं देवी रमैव बहु-रूपिणी ।
सूर्य्य-सोम-पुताशाश्च पद्मे श्रीस्त्री-गुणात्मिका ॥ 54 ॥

आत्मान्तरात्म-परमात्म-ज्ञानात्मानश्च मूर्त्तयः ।
विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च ॥ 55 ॥

प्रह्वी सत्या तथेशानाऽनु-ग्रहा चेति शक्तयः ।
अष्ट-दिक्षु च मद्ध्ये च स्वरूपाण्येव ता हरेः ॥ 56 ॥

ततोऽनन्तं योग-पीठ-स्वरूपं पूजयेद्धरेः ।
तत्राऽवाह्य हरिं चार्घ्यं पाद्यामाचमनीयकम् ॥ 57 ॥

मधु-पर्कं पुनश्चाऽचां स्नानं वासो-वि-भूषणे ।
उपवीतासने दत्त्वा गन्ध-पुष्पे तथैव च ॥ 58 ॥

लक्ष्मी-धरे यजेत् तत्र पार्श्वयोरुभयोर्हरेः ।
हृदयादींस्तथेन्द्रादि-दिक्ष्वस्त्रं कोणकेषु च ॥ 59 ॥

वासुदेवादिकान् दिक्षु केशवादींस्ततः परम् ।
मत्स्य-कूर्म्म-वराहांश्च नारसिंहं च वामनम् ॥ 60 ॥

भार्ग्गवं राघवं कृष्णं बुद्धं कल्किनमेव च ।
अनन्तं विश्व-रूपं च तद्बहिः पूजयेत् क्रमात् ॥ 61 ॥

अनन्त-ब्रह्म-वाय्वीशान् वीशं चाग्रे प्र-पूजयेत् ।
वारुणीं चैव गायत्रीं भारतीं गिरिजामपि ॥ 62 ॥

कोणेषु वीन्द्र-वामे च सुपर्ण्णीं प्रयजेदपि ।
इन्द्रादीन् शेष-विध्यन्तान् स-भार्यान् स-परिग्रहान् ॥ 63 ॥

धूप-दीपौ ततो दत्वा नैवेद्यं मूल-मन्त्रतः ।
अनेन क्रम-योगेन जुहुयात् संस्कृतेऽनले ॥ 64 ॥

पुष्पाञ्जलिश्च होमश्च मूलेनाष्टोत्तरं शतम् ।
सकृत्-सकृत् पुष्पमन्यैर्होमस्तस्य चतुर्ग्गुणः ॥ 65 ॥

वि-सर्ज्जयित्वा नैवेद्यं मूलेन त्रिः समर्च्च्य च ।
धूप-दीपौ पुनर्द्दत्वा पुनर्म्मुलेन पूर्ववत् ॥ 66 ॥

अर्चयित्वा पुनर्ध्यात्वा जपेदष्टोत्तरम् शतम् ।
पुनर्ध्यायेद्धरिं सर्व-देव-देवेश्वरं प्रभुम् ॥ 67 ॥

जप-ध्यान-पुतार्च्चादीनेवं यः कुरुते सदा ।
धर्म्मार्त्थ-काम-मोक्षाणां भाजनं स्यात् स एव हि ॥ 68 ॥

सर्वोत्तमं हरिं ज्ञात्वा य एवं भक्ति-पूर्वकम् ।
जप-ध्यानादिभिर्न्नित्यं पूजयेन्नास्य दुर्लभम् ॥ 69 ॥

भक्तिं कृत्वाऽन्य देवेषु ब्रह्म-रुद्रादिकेष्वपि ।
सर्वोत्कर्षमविज्ञाय विष्णोर्य्याति तमो ध्रुवम् ॥ 70 ॥

न यज्ञा न च तीर्त्थानि नोपवास-व्रतानि च ।
दैवतानि च सर्वाणि त्रातुं तं शक्नुयुः क्वचित् ॥ 71 ॥

हरिर्हि सर्व-देवानां परमः पूर्ण्ण-शक्तिमान् ।
स्वतन्त्रोऽन्ये तद्वशा हि सर्वेतः स जगद्गुरुः ॥ 72 ॥

ब्रह्मादयश्च तद्भक्त्या भागिनो भोग-मोक्षयोः ।
तस्माज्ज्ञेयश्च पूज्यश्च वन्द्यो ध्येयः सदा हरिः ॥ 73 ॥

॥ इति श्रीमदानन्द-तीर्थ-भगवत्पाद-विरचिते श्रीमत्-तन्त्र-सार-सङ्ग्रहे प्रथमोऽध्यायः ॥

## ॥ द्वितीयोऽध्याय: ॥

ओं ॥ यस्य-कस्यापि मन्त्रस्य न्यासः पञ्चाशदक्षरैः ।
वीर्य-दः केऽभितो-वक्त्रमक्षि-कर्ण्णेषु नासयोः ॥ 01 ॥

गण्डयोरोष्ठयोर्दन्त-पङ्क्त्योर्मूर्द्धनि वा चि च ।
दोः पत्सन्धिषु साग्रेषु पार्श्वयोः पृष्ठ-गुह्ययोः ॥ 02 ॥

तुन्दे च हृदि धातूनां सप्तके प्राण-जीवयोः ।
स-क्षकारान् न्यसेद् वर्णान् नृ-सिंहः क्षस्य देवता ॥ 03 ॥

जपे न्यासे च विहितः क्षोऽक्षराणां सदाऽन्ततः ।
प्राणायामो रेचयित्वा पूरयित्वा च कुम्भके ॥ 04 ॥

तार-त्रि-द्वादशावर्त्तैर्य्येक-द्वादशकेन वा ।
तत्तन्मन्त्रेण वा कार्य्यो गायत्र्या दश-तारकैः ॥ 05 ॥

आदावेव जपे कुर्य्याच्छोषणं दहनं प्लुतिम् ।
वाय्वग्नि-वारुणैर्भीजैर्ध्यात्वा तन्मण्डले हरिम् ॥ 06 ॥

एक-पञ्चाशदर्णानाम् चतुर्विंशति मूर्तयः ।
आत्माद्या वासुदेवाद्या विश्वाद्या मत्स्य-कच्छपौ ॥ 07 ॥

कोलो नृसिंहः स-वटुर्ज्जामदग्न्य-रघूद्वहौ ।
वासिष्ठ-यादवौ कृष्णावात्रेयो बुद्ध-कल्किनौ ॥ 08 ॥

शिंशुमारश्चेति शतं कलाः कलश-नामकाः ।
एताभिः सहितां मूल-मूर्त्तिं कुम्भोदके सुधीः ॥ 09 ॥

पूर्वोक्त-विधिनाऽभ्यर्च्य प्रतिमां शिष्यमेव च ।
स्नापयेत् पूर्वमाचार्यो जपोऽनूनः सहस्रतः ॥ 10 ॥

मूल-मन्त्रस्य जाङ्गानां न्यासः स्नानादनन्तरम् ।
प्रतिमायां सन्निधि-कृच्छिष्ये माहात्म्या-कृद् भवेत् ॥ 11 ॥

कलशः कीर्तिमायुश्च प्रज्ञां मेधां श्रियं भगम् ।
योग्यतां पाप-हानिं च पुण्य-वृद्धिं च साधयेत् ॥ 12 ॥

उप सर्ग्गेषु जातेषु दैव-भूतात्म-हेतुषु ।
आयुषे वाऽथ शान्त्यै  वा श्रिये वा पुण्य-वृद्धये ।
योग्य-तायै मन्त्र-सिद्ध्यै विष्णोः प्रीत्यर्थमेव वा ॥ 13 ॥

जुहुयात्  सहस्रमयुतं लक्षं कोटिमथापि वा ।
पूर्व-वत् सं-स्कृते वह्नौ ध्यात्वा देवं जनार्दनम् ॥ 14 ॥

कृत्वा त्रि-मेखलं कुण्डं चतुर्विंशाङ्गुल्योच्छ्रितम् ।
तावत् खातं चतुष्कोणमुच्छ्रितं द्वादशैव वा ॥ 15 ॥

द्व्यङ्गुलं त्र्यङ्गुलं वाऽपि चतुरङ्गुलमेव वा ।
विस्तारो मेखलानां स्यादन्त्या वा चतुरङ्गुला ।
चतुर्विंशाङ्गुलं वा तद्-विस्तारो द्वादशैव वा ॥ 16 ॥

अश्वत्थ-पत्राकृतिः स्यान्मूलतो द्वादशाङ्गुला ।
योनिः खाते च विनता प्रविष्टा व्यङ्गुलं तथा ॥ 17 ॥

तदात्मनि हरिं ध्यायेत् कुण्डे देवीं श्रियं तथा ।
विष्णु-वीर्यात्मकं वह्निं नि-क्षिपेत् प्रणवेन ह ॥ 18 ॥

कुर्य्यात् क्रियाः षोडश च व्याहृतिभिः पृथक्-पृथक् ।
वह्नेस्द-ग-हरेः प्रीतिं कुर्वन् द्रव्यैर्यजेत् ततः ॥ 19 ॥

आज्येन वा पायसेन समिद्धि क्षीरिणामथ ।
तिलैर्वा तण्डुलैर्वाऽथ मधुरैस्त्रिभिरेव वा ॥ 20 ॥

ब्रह्म-पत्र-समिद्भिर्वा समिद्भिर्वाऽमृतोद्भवैः ।
अमृताः समिधो ज्ञेयाः सर्वत्र चतुरङ्गुलाः ॥ 21 ॥

एवमेव तु दीक्षायामाज्येनैव हुति-क्रिया ।
पूजा च कार्य्या विधिवत् पूर्वं सर्वे-हुतेष्वपि ॥ 22 ॥

गुरवे दक्षिणां दद्याल्लक्षे-लक्षे शतं सुधीः ।
आत्मनैव कृते होमे शक्तितो गुरु-दक्षिणा ॥ 23 ॥

॥ इति श्रीमदानन्द-तीर्थ-भगवत्पाद-विरचिते श्रीमत्-तन्त्र-सार-सङ्ग्रहे द्वितीयोऽध्यायः ॥

## तृतीयोऽध्यायः

ओं ॥ प्रतिष्ठां कारयन् विष्णोः कुर्य्यात् सु-प्रतिमां बुधः ।
लोहैर्वा शिलया दार्वा मृदा वाऽपि यथा-क्रमम् ॥ 01

षण्णवत्यङ्गुलां योग आसीनामथवा स्थिताम् ।
शयानां वा मुमुक्षूणां व्या-चक्षाणां निजां स्थितिम् ॥ 02 ॥

मुखादूर्द्ध्वं द्व्यङ्गुलोच्चां नवाङ्गुल-लसन्मुखाम् ।
सु-वृत्त-त्र्यङ्गुल-ग्रीवामा स्तानाच्च षडङ्गुलाम् ॥ 03 ॥

पञ्चादशाङ्गुलां नाभेरा सार्द्ध-दशकाङ्गुलाम् ।
वृषणादा मूल-तश्च सार्द्ध द्व्यङ्गुलमायताम् ॥ 04 ॥

तावदा गुदतो दीर्घां चैत्यादाऽष्टादशाङ्गुलाम् ।
तथा द्व्यङ्गुल-चैत्यां च द्वा-विंशज्जङ्घया युताम् ।
आरभ्य गुल्फमद्धैव सहार्द्ध-चतुरङ्गुलाम् ॥ 05 ॥

षडङ्गलोच्च-प्र-पदां सार्द्ध-त्र्यङ्गुलमेव च ।
प्र-पदोच्च-युतामन्ते द्व्यङ्गुल-प्र-पदोच्छ्रयाम् ॥ 06 ॥

त्र्यङ्गुल-व्यङ्गुलामर्द्ध-हीनमध्याङ्गुलामपि ।
त्रि-पादाङ्गुल-हीनान्यां ततस्तादृश-तत्पराम् ॥ 07 ॥

पादोनोच्चाङ्गुष्ठ-नखां तदर्द्ध-तदनन्तराम् ।
क्रमशः पाद-हीनान्यां रक्त-पाद-नखां शुभाम् ॥ 08 ॥

विस्तारः प्र-पदस्यापि षडङ्गुल उदा-हृतः ।
अङ्गुष्ठ-परि-णाहस्तु चतुरङ्गुल ईरितः ।
त्र्यङ्गुलस्तु तदन्यः स्याद् ब्रीह्यर्द्धोनाः क्रमात् पराः ॥ 09 ॥

दशाङ्गुलं जङ्घ-मूलं मध्यं तु त्र्यङ्गुलाधिकम् ।
सप्तादशाङ्गुलं तूर्द्धं जानुरष्टादशाङ्गुलः ॥ 10 ॥

ऊर्वन्तोऽपि तथा ज्ञेयो मध्यं द्वि-द्वादशाङ्गुलम् ।
चतुरङ्गुलाधिकं मूलं गुह्यं सार्द्ध-चतुष्टयम् ॥ 11 ॥

सार्ध-त्रयं परी-णाहाद् वृषणं चतुरङ्गुलम् ।
सप्ताङ्गुलं परी-णाहाद् वृत्तं प्रोक्तं समस्तशः ॥ 12 ॥

अष्ट-त्रिंशाङ्गुलं कट्याः परिणाह उदा-हृतः ।
सु-वृत्तत्वं तथा श्रोण्योः पीनत्वं च समस्तशः
विस्तारश्च तथा कट्याः सु-प्रतिष्ठित-ता पदोः ॥ 13 ॥

कट्याश्चैवाङ्गुलाधिक्यं नाभेरथ उदा-हृतम् ।
नाभिः सार्धाङ्गुलश्चैव गम्भीरोऽर्धाङ्गुलोऽन्ततः ॥ 14 ॥

वृत्तः प्रदक्षिणश्चैव द्वि-चत्वारिंशदङ्गुलम् ।
मध्यं स्तने परी-णाहः षडङ्गुलमतोधिकः ॥ 15 ॥

एकोन-विंशाङ्गुलं तदुरो-विस्तार-लक्षणम् ।
पादोनमङ्गुलं चैव भुजाभ्यां सह सार्द्धकम् ॥ 16 ॥

अंसयोर्विस्तृतिश्चैव पृथगष्टाङ्गुला मता ।
सप्ताङ्गुलोच्छ्रयः कक्षदुपरि स्कन्धयोर्म्मतः ॥ 17 ॥

अष्टत्रिंषाङ्गुलं चैव हस्तयोर्मानमुच्यते ।
अष्टादशाङ्गुलो बाह्वोः परिणाह उदाहृतः ।
क्रमादूनां तदन्ते तु सार्द्धाष्टाङ्गुलमीरितम् ॥ 18 ॥

साङ्गुलस्तु तळः सार्द्ध-नवाङ्गुल उदा-हृतः ।
समं तदुभयं ज्ञेयं तथैव तळ-विस्तृतिः ॥ 19 ॥

अर्द्धाङ्गुलोनता मध्याद् द्वयो सार्धाङ्गुलोनता ।
कनिष्ठिकायास्तस्यास्तु ब्रीहि-मानाधिकः परः ॥ 20 ॥

सार्द्ध-त्रय-परी-णाहौ मध्य-ज्येष्ठवादा-हृतौ ।

अन्यौ ब्रीहि-तदद्धोर्नावन्या सार्द्ध-द्वयाङ्गुला ।

पादोनान्त-परी-णाहाः सर्वे ज्येष्ठां विना स्मृताः ॥ 21 ॥

वक्षो-विस्तार-सदृशः परि-णाहो गळस्य च ।

ललाट कुक्षि-कण्ठास्तु दीर्घ-रेखा-त्रयान्विताः ॥ 22 ॥

वृतो गळो बाहवश्च स्तनावङ्गुलयस्तथा ।

रक्तास्थळ-नखाश्चैव नेत्रान्तोऽधर एव च ॥ 23 ॥

उत्तरोष्ठश्च जिह्वा च नखौ पादोनकाङ्गुलौ ।

अर्द्धाङ्गुलौ तथा मध्यावन्येऽष्टांश-क्रमोनकाः ॥ 24 ॥

नासिकाय अथस्ताच्च नासिका च रराटिका ।

समा मानेन नासाया उच्च-त्वेनैव मापने ।

अर्द्धाङ्गुलाधिकं सर्व-मुखस्य तु भविष्यति ॥ 25 ॥

चतुरङ्गुलं तथैवाऽस्यं सार्ध-ब्रीह्यधरं स्मृतम् ।

उत्तरं ब्रीहि-मात्रं तु तदूर्द्ध्वं चाधरोपमम् ।

सार्द्धाङ्गुलमधः प्रोक्तमधरादध एव च ॥ 26 ॥

आस्य-पार्श्व-द्वयं प्रोक्तमा कर्णात्तु षडङ्गुलम् ।

सप्ताङ्गुलं नासिकायाः पार्श्वमा कर्णतः स्मृतम् ॥ 27 ॥

स-पादाङ्गुलमुच्चा च नासिका परि-कीर्त्तिता ।
अर्द्धाङ्गुले पुटे तस्या मध्यं च समुदा-हृतम् ॥ 28 ॥

नासिका ब्रीहि-विस्तारा चक्षुषी अङ्गुल-त्रये ।
अङ्गुलं चैव विस्तीर्ण्णे फुल्लेऽर्द्धं च तदन्यथा ॥ 29 ॥

चतुरङ्गुलौ भ्रुवौ चैव तथाऽर्द्धाङ्गुल-विस्तृतौ ।
अ-सं-हतौ च निबिडौ तथा पक्ष्म सु-नीलकम् ॥ 30 ॥

‘कर्ण्णौ च त्र्यङ्गुलौ सार्ध-द्वय-विस्तार-सं-युतौ ।
स-कुण्डलौ तावदेव विवरं सं-प्र-कीर्त्तितम् ॥ 31 ॥

तथा द्व्यङ्गुल-विस्तारं लताभ्यां सह कथ्यते ।
कर्ण्ण-पूर-युतौ कर्ण्णावुत्पलाभ्यां च सं-युतौ ॥ 32 ॥

नीलाळक-सहस्रेण युक्तं तन्मुख-पङ्कजम् ।
ललाटं सु-विशालं च तथा सार्द्ध-नवाङ्गुलम् ।
विस्तारो मूर्द्ध्नि वृत्तं च शिरश्छत्राकृति स्मृतम् ॥ 33 ॥

दीर्घाश्च कुञ्चिताग्राश्च नीलाः केशा हरेर्म्मताः ।
मुख-मानेन चैवोर्द्ध्वं किरीटं केशवस्य हि ॥ 34 ॥

कुण्डले मकराकारे वक्षश्चैव स-कौस्तुभम् ।

स-श्री-वत्सं दक्षिणतः पीन-तुङ्गमुदा-हृतम् ॥ 35 ॥

हार-ग्रैवेय सहितमुप-वीत-युतं तथा ।
बाहवश्च स-केयूर-कङ्कणाङ्गद-मुद्रिताः ॥ 36 ॥

स-मद्य-बन्धं मध्यं च नितम्बे पीतमम्बरम् ।
काञ्ची-गुणश्च पदयोर्न्नूपुरे चाति-सु-स्वरे ।
अङ्गुलीयानि च पदोः कृतिभिः साधु कारयेत् ॥ 37 ॥

सोत्तरीयं च चक्राद्यैरायुधैश्च समन्वितम् ।
अनुन्नतैरविरळैर्दन्तैर्य्युक्तं च सु-स्मितम् ।
सम-दृष्टि-युतं कार्य्यं स्निग्धं चैव मनो-हरम् ॥ 38 ॥

प्रतिमार्त्थं व्रजन् पञ्च-ध्वनिभिर्म्मङ्गळैर्युतः ।
गत्वा शुचि-स्थलं तत्र शिलां चैव परीक्षयेत् ॥ 39 ॥

ध्वनि-भेदेन विज्ञाय शिलां गर्भ-वतीं त्यजेत् ।
मूल-मन्त्रं जपन् विष्णुं ध्यायंस्तिष्ठेदुपोषितः ।
वार्क्षीं चेद् यज्ञ-वृक्षस्य सारेणैव तु कारयेत् ॥ 40 ॥

बलि-दानं च सङ्क्षेप-विधानेनैव कथ्यते ।
अस्य सङ्क्षेप-शास्त्रत्वान्न विस्तर-विरोधिता ॥ 41 ॥

दत्वोपहारं हरये तद्भूतेभ्यो बलिं हरेत् ।
प्राच्येभ्यो विष्णु-भूतेभ्यः इत्याध्यखिल-दिक्षु च ॥ 42 ॥

आदाय विष्णु-भूतेभ्यो लोक-पेभ्यस्तथा हरेः ।
अनुज्ञामुद्धरेद् वृक्षं शिलां वा प्रतिमाकृते ॥ 43 ॥

प्रतिमां पिण्डिकां पीठं शिलाभिस्तुति-जातिभिः ।
स्वर-स्थूलत्व-भेदेन पुं-स्त्राद्या जातितः शिलाः ।
पुं-शिला प्रतिमार्त्थं तु स्त्री-शिला पीठ-क्लृ प्तये ॥ 44 ॥

वेद-मङ्गल घोषेण वाद्यैस्तत्-प्रतिमां हरेत् ।
प्रागुदक्-प्रवणे देशे कुर्य्याद् देवालयं सुधीः ॥ 45 ॥

समा-वृते दक्षिणतः पश्चाद् गिर्य्यग्र एव वा ।
मध्ये वा ग्राम-पुरयोर्विशाले सु-शुचौ तथा ॥ 46 ॥

ऐशानीं दिशमेकां तु विलोदक-वि-वर्जिते ।
जलाशयस्य मध्ये वा शिला-वृक्ष-वि-वर्जिते ॥ 47 ॥

श्मशानादिक-देशेनां विदूरे सु-मनो-हरे ।
किष्कु-द्वादशतोऽनूनं कुर्य्याद् देवालय-स्थलम् ॥ 48 ॥

कृत्वा भू-शोधनं सम्यक् सार्द्ध-पुं-मानतस्त्वधः ।

केशाङ्गरास्थि-वल्मीक-लोष्टाष्मादि-वि-वर्जिते ॥ 49 ॥

हरिं तत्रापि सं-पूज्य बलिं दत्वा च पूर्व-वत् ।
मृद्दारु-शैललोहैर्वा कुर्य्याद् देवालयं दृढम् ॥ 50 ॥

दीर्घ-स्थ-कळमास्तिस्त्रस्तिर्य्यगष्ट-यवोदराः ।
अङ्गुल्या मद्ध्य-रेखायाः समा लक्षमः स्मृताः ॥ 51 ॥

स्वाङ्गुल्या मद्ध्य-रेखा तु प्रतिमादिषु लक्षणम् ।
ह्रस्व-मध्योच्च-भेदेन तत्तन्मानं समस्तशः ।
प्रादेश-हस्त-पुरुष-मानं सामान्य-लक्षणम् । 52 ॥

प्रतिमाध्यर्द्ध-कं द्वारमूर्द्धमर्द्धं च वि-स्तृतिः ।
प्रतिमार्द्ध-प्रमाणेन पीठस्योच्चत्वमिष्यते ॥ 53 ॥

उन्नतिः पिण्डिकायास्तच्चतुरङ्गुल-मानतः ।
त्र्यङ्गुलं द्व्यङ्गुलं वाऽपि गृहान्तः प्रतिमा-समम् ।
ऊर्द्ध्वं पर्य्यक् च क्रमश उच्चत्वं मध्यतः स्मृतम् ॥ 54 ॥

तावदुच्चं बहिश्चैव यद्येक-शिखरं भवेत् ।
अर्द्धोच्चमथवाऽपि स्यादधस्तात् प्रतिमोन्नतम् ।
ततो द्विगुण-मानं वा सार्द्ध-प्रतिममेव वा ॥ 55 ॥

शिखरान्तरे तु प्रतिमा-मानं तद्वळ उच्यते ।
स-त्रि-पादं तदर्द्धं वा तदध्यर्द्धमथापि वा ॥ 56 ॥

वर्त्तुलं पद्म-सदृशं हस्ति-पृष्ठ-समं तथा ।
चतुरश्रं चाष्ट-कोणं विमानं परिकीर्त्तितम् ॥ 57 ॥

प्रतिमाया दश-गुणं विंशद्-गुणमथापि वा ।
वर्त्तुलं शिखरं त्वेकं किरीटाकृति-मद् भवेत् ॥ 58 ॥

सभयाऽपि समेतं वा पृथक्-सभमथापि वा ।
द्वि-सभं त्रि-सभं वाऽपि सु-गोपुरमथापि वा ॥ 59 ॥

प्राकार-वृत्त-युक्तं वा सप्त-प्राकारमेव वा ।
सद्म वृत्तं किष्कु-मात्रं बहिर्वा चतुरश्रकम् ॥ 60 ॥

ततः परं किष्कु-मात्रं सभाया अन्तरं यदि ।
ततस्तावत् तृतीयायाः सार्द्धमेव ह्युदा-हृतम् ॥ 61 ॥

किष्कु-त्रयं च शक्रादेः स्थानं तद्वृत्त-तः स्मृतम् ।
ततस्तु मण्डपं कुर्य्यात् प्रतिष्ठायाः सु-लक्षणम् ॥ 62 ॥

पूजयेद् वास्तु-पुरुषस्योपरि-स्थांस्तु सर्व-दा ।
देवान् ब्रह्मादि-कान् वास्तुर्वराहस्य हरेः सुतः ।

पतितो दैवतैर्भूमौ चतुरश्राकृतिः स्थितः ॥ 63 ॥

कृत्वाऽष्टकाष्ट-कोष्ठानि मद्ध्ये ब्रह्मा चतुष्टये ।
पूज्यो द्वये-द्वये शक्रो यमो वरुण एव च ।
सोमश्च पूज्याः कोणेषु वह्न्याद्याः कोण-देवताः ॥ 64 ॥

पुनस्त्रये-त्रये कामं धातारं स-विधातृकम् ।
स्कन्दं च पूजयेत् कोणे सूर्यं चैव विनायकम् ।
कालं कुबेरं च बहिः प्रत्येकं दिक्षु पूजयेत् ॥ 65 ॥

हारिं हरिं गभीरं च गाहनं गहनं शुभम् ।
त्रातमङ्गारकं चैव पूर्वस्यां दिशि पूजयेत् ॥ 66 ॥

दारणं विदरिं दूतं प्र-द्योतं द्योतनं दरिम् ।
मृत्युं शनैश्चरं चैव दक्षिणस्यां प्र-पूजयेत् ॥ 67 ॥

पुष्करं क्षरणं क्षारिं विक्षरं क्षोभणं क्षणम् ।
चार्वाङ्गं भार्ग्गवं चैव पश्चिमस्यां प्रपूजयेत् ॥ 68 ॥

चारं वि-चारं प्र-चरं सं-चरं चारणं चरम् ।
बृहस्पतिं बुधं चैवाप्युत्तरस्यां प्र-पूजयेत् ।
एवमेव विमानस्य कृतेः प्रागपि पूजयेत् ॥ 69 ॥

सप्त-पण्ण-मयं साधु कारयेन्मण्डपं ततः ।

सप्त-हस्त द्वि-षड्ढस्तमथवा द्वि-गुणं ततः ।

चतुर्ग्गुणं वा सम्यक् तु चतुरश्रम् सहाजिरम् ॥ 70 ॥

अन्यच्च मण्डपम् दीर्घं पञ्च-हस्तं तु कारयेत् ।

त्रि-चतुष्कोष्ठकं तत्र मद्ध्ये प्रागायतं शुभम् ।

कारयेन्मण्डलं साधु हस्त-मात्र-सु-विस्तृतम् ॥ 71 ॥

तत्र द्वादश पात्राणि स्थापयेत् पालिकादिकम् ।

पालिकास्तु चतुर्विंशत्यङ्गुलोच्छ्रय-सं-युताः ॥ 72 ॥

अष्टादशाङ्गुलाश्चैव तथा पञ्च-मुखा इति ।

द्वादशाङ्गुल-काश्चैव शरावाः पश्चिमानु-गाः ॥ 73 ॥

तत्र विष्णुं चतुर्म्मूर्त्तिं पूजये भक्तितस्त्रिशः ।

सप्त-धान्यानि तेष्वेव पूरयेदङ्कुरात्र्थतः ॥ 74 ॥

तत्र नित्यं बलिं दद्याद् विष्णवे दश-रात्र-कम् ।

ब्रह्म-शङ्कर-गीर्वाण-पितृ-गन्धर्व-यक्ष-कैः ॥ 75 ॥

भूतैश्च पायसेनैव तथा पद्माक्षतेन च ।

अन्नापूपेन पुष्पान्नैरन्न-लाजाक्षतैरपि ।

सक्तुभिश्च क्रमेणैव देवान्तं पायसेन वा ॥ 76 ॥

तत्रैव प्रतिमायाश्च कारयेदधि-वासनम् ।

पञ्च-गव्ये सप्त-रात्रं क्षिप्त्वा पुरुष-सूक्ततः ॥ 77 ॥

वेदांश्च चतुरः सम्यक् पारयेयुर्द्विजोत्तमाः ।

प्राच्यादि-द्वार-गौ द्वौ-द्वावेकैकं तु दशावराः ।

यथा-लब्धं यथा-वित्तमथवा विष्णु-तत्पराः ॥ 78 ॥

त्रयोदशात्र कुण्डानि परितः कारयेद् बुधः ।

उक्त-लक्षण-युक्तानि प्रधानं त्वग्नि-कोणके ।

साक्षात् तु कोणकाद्धस्त-मात्रमन्तरतः सुधीः ॥ 79 ॥

आज्याहुतिं तेषु कुर्य्यात् प्रत्येकं लक्ष-सङ्ख्यकम् ।

प्रत्येकमयुतं वाऽपि प्रधाने लक्ष-सङ्ख्यकम् ।

अर्धं तदर्धमथवा मूल-मन्त्रेण मन्त्रवित् ॥ 80 ॥

पञ्च विंशति तत्वार्थे प्रधाने जुहुयात् पुरः ।

प्रत्येकं तु सहस्रं वा प्रत्येकं शतमेव वा ।

शतं पुरुष-सूक्तेन गायत्र्या च सहस्रकम् ॥ 81 ॥

कृत्वा जलाधि-वासं च पूर्वं वा पञ्च-गव्यतः ।

चक्राब्जं भद्रकं वाऽपि मण्डपे मण्डलं शुभम् ॥ 82 ॥

पद्मं वृत्त-त्रयं चक्रं राशयो वीथिका तथा ।

शोभोप-शोभिकाश्चैव चक्राब्जस्य तु लक्षणम् ।

चतुरश्रं विना चक्रं विशेषो भद्रके स्मृतः ॥ 83 ॥

सहस्रमर्द्धं पादं वा कलशांस्तत्र पूरयेत् ।

शतं तदर्द्धं पादं वा वित्ताभावे नि-गद्यते ॥ 84 ॥

क्वाथेन क्षीर-वृक्षाणां तथा पञ्चामृतैरपि ।

पञ्च-गव्येन शुद्धेन जलेन च पृथक् पृथक् ।

पूरयेत् कलशान् मध्यं शुद्धोदेनैव पूरयेत् ॥ 85 ॥

ब्राह्मस्यैव चतुर्दिक्षु गन्धोदानां चतुष्टयम् ।

चतुर्द्दळ-श्वेत-पद्म-चतुष्के मण्डल-स्थिते ॥ 86 ॥

पूर्वादि-क्रम-योगेन रस-क्वाथशुभोदकान् ।

गन्धांश्च स्थापयेत् पञ्च-गव्यं शुद्धान्तरे न्यसेत् ।

पृथक् चतुर्द्दळं पद्मं रक्तं कृत्वाऽल्पकं सुधीः ॥ 87 ॥

पञ्चाशत्त्वे तु गन्धोदं सर्व-मध्ये नि-धापयेत् ।

ब्राह्मस्य पुरतस्त्वेकं सार्वं सं-स्थापयेद् बृहत् ।

अष्ट-दिक्ष्वष्ट-पद्मेषु पञ्चकं-पञ्चकं न्यसेत् ॥ 88 ॥

अनेन क्रम-योगेन कलशा अखिला अपि ।

तत्तद्-द्रव्य-मयास्तत्र-तत्र स्थाप्यास्तु बाह्यतः ।

तदैवाङ्कुर-पात्राणि-परितस्तत्र वि-न्यसेत् ॥ 89 ॥

कुशोदकं च कार्प्पूरं कौम्कुमं चान्दनं तथा ।

तुहिनोदं हैरिभेरमौशीरं कौष्ठ-सार्वके ॥ 90 ॥

नदी-सङ्गम-जं चैव तटाकं कौप्यमेव च ।

निर्ज्झरोदमिति प्रोक्ता विशेष-कलषा इमे ।

शुद्धोद-द्वयमप्येतन्महा-तीर्त्थ-समुद्भवम् ॥ 91 ॥

चतुर्विंशत्तु मूर्त्तीनां वर्ण-मूर्त्तिस्तथाऽपराः ।

आ-वाहयेच्छतत्वे तु क्रम-व्युत्-क्रमतस्तु ताः ॥ 92 ॥

वर्ण्ण-मूर्त्तिः पुनश्चैव द्वि-चातुर्वारमेव च ।

सहस्र-कलशादित्वे जपेन्मन्त्रांश्च शक्तितः ॥ 93 ॥

ततस्तु पञ्च-घोषैश्च वेद-घोषैस्तथाऽऽदरात् ।

आनीय प्रतिमां स्नानं कारयेत् प्रणवेन तु ॥ 94 ॥

मन्त्रैः पुरुष-सूक्तान्तैर्विश्वतश्चक्षुषा तथा ।

पुनश्चाष्टाक्षरेणैव प्रणवेनैव भक्तितः ॥ 95 ॥

स्नापयित्वा गन्ध-जलैर्ग्गन्ध-पुष्पादिभिः पुनः ।

अलं-कृत्य स्थापयेत्तु प्रतिमां प्रणवेन तु ॥ 96 ॥

जपेदष्टाक्षरं मन्त्रं तत्तन्मूर्त्ति-मनुं तथा ।
अष्टोत्तरं-शतं मन्त्री ध्यायेत् तेजो-मयीं पुनः ॥ 97 ॥

प्रतिमां प्रतिमान्तःस्थां तन्मद्ध्ये-परमं वपुः ।
चिदानन्द-रसं सर्व-गुण-सम्पूर्णमुत्तमम् ॥ 98 ॥

पञ्च-विंशति-तत्वानां देवतास्तदनन्तरम् ।
स्थापयेत् प्रतिमा-मद्ध्ये परितः केशवस्य तु ॥ 99 ॥

तत्राऽत्वाहार्ष-सूक्तं च घर्म्म-सूक्तं च वैष्णवम् ।
सूक्तं च विश्व-कर्म्मीयं पौरुषं सूक्तमेव च ॥ 100 ॥

जप्त्वा चैव निजं मन्त्रं पुनरष्टाक्षरं सुधीः ।
प्रणवं च जपेद् विष्णुं द्ध्यायन्नुत्तम-रूपिणम् ॥ 101 ॥

ततस्तु कलशैर्बाह्य-क्रमेणैव जनार्द्दनम् ।
स्नापयेदुक्त-मन्त्रैस्तु मध्यमं प्रणवेन तु ॥ 102 ॥

अष्टाण्र्णेन निजेनापि तथा पुरुष-सूक्ततः ।
आ-वाहनं च स्नपनं पञ्च-गव्यस्य मद्ध्य-वत् ॥ 103 ॥

पूर्वाद्युत्तर-पर्य्यन्तः  कलश-क्रम उच्यते ।
जप्त्वा पुनश्च तन्मन्त्रान् पूजयेच्च विधानतः ॥ 104 ॥

द्वार-लोक-पतिभ्यश्च बलिं दत्त्वा यथा-क्रमम् ।

वस्त्र-रत्न-हिरण्याद्यैरलङ्कृ-कृत्य वि-भूतितः ॥ 105 ॥

गुरवे दक्षिणां दद्यात् कोटिं लक्षं सहस्रकम् ।

शतमर्द्धं तदर्द्धं वा निःस्वो भक्त्या क्षमापयेत् ।

तदर्द्धमृत्विजां चैव तदर्द्धं पारणा-कृताम् ॥ 106 ॥

आ श्वभ्य आ श्व-पाकेभ्यो दद्यादन्नं समस्त-शः ।

पुरस्तात् पर-तश्चैव सप्त-रात्रं निरन्तरम् ॥ 107 ॥

सुवर्ण्ण-वस्त्र रत्नाद्यैरा-गताभ्यागतानपि ।

पूजयेच्छक्तितो भक्त्या प्रीयतां भगवानिति ॥ 108 ॥

गीत-नृत्त्यैश्च वाद्यैश्च पूराणैरिति-हासकैः ।

स्तोत्रैर्मङ्गल-घोषैश्च वैदिकैर्द्दिन-सप्तकम् ॥ 109 ॥

नयेत् ततो महा-राज-विभूत्याऽवभृथं सुधीः ।

कारयेद् देव-देवस्य स्वाध्यायैर्ग्गीत-नर्त्तनैः ॥ 110 ॥

महा-नदी-सङ्गमे तु तीर्थे वाऽति-प्रशस्तके ।

स्नापयेत् पूर्व-वन्मन्त्रैः पुं-सूक्तान्तैः स्मरन् हरिम् ॥ 111 ॥

ततः पूर्ववदा-गत्य प्रवेश्य पूरुषोत्तमम् ।

पूजयित्वा विधानेन दत्त्वा दानानि शक्तितः ।

गुरुं च भक्त्या सं-पूज्य स्वीकुर्य्यादाशिषस्ततः ॥ 112 ॥

शत-प्रस्थादनूनं तु नैवेद्यं पायसोत्तरम् ।

दिनेष्वेतेषु दातव्यं स-घृतं स-सितादिकम् ।

पश्चादपि यथाशक्ति पूजा कार्य्या हरेः सदा ॥ 113 ॥

जीर्णालयोद्धृतौ चैव तत्व-मन्त्रान् स्वकं तथा ।

प्रति-लोमेन जप्त्वैव मूर्त्तौ सं-कोचयेद्धरिम् ॥ 114 ॥

उक्तेनैव विधानेन तदर्द्ध-विभवैः सुधीः ।

पाद-मात्रैरपि हरिं स्नापयित्वा यथोदितम् ॥ 115 ॥

एतेनैव विधानेन कृत्वा देवालयं पुनः ।

स्नापयेत् पुण्डरीकाक्षं द्वि-गुणेन प्र-वाहनात् ॥ 116 ॥

विभवेनानु-लोमेन जपेन्मन्त्रान् पुनस्तथा ।

आराधयेज्जगन्नाथं ध्यायन् भक्त्या यथोदितम् ॥ 117 ॥

यात्राऽपि पूर्व-वत् तत्राप्युत्सवेषु च सर्वशः ।

कलशोक्त-विधानेन पूजा बलि-हृतिस्तथा ॥ 118 ॥

उत्सवेषु सदा कार्य्या कलशश्चोत्रवादनु ।

यात्रा-स्नानं च कर्त्तव्यं सम्यगुक्त-विधानतः ॥ 119 ॥

चोर-चण्डाल-पतित-श्वोदक्यादि-प्र-वेशने ।
शवाद्युप-हतौ चैव पूजा-विच्छेदने तथा ।
स्नपनोक्तेन मार्ग्गेण प्रायश्चित-विधिः स्मृतः ॥ 120 ॥

सर्वत्र विष्णु-गयत्र्या होमः स्यादयुतावरः ।
नावाव्याद्यभिधानानु विद्महे धीमहे तथा ।
प्र-चोदयात् तृतीयाधस्तन्नो गायत्त्रि-नामिका ॥ 121 ॥

दुर्ग्गा-शिव-स्कन्द-सूर्य्य-विनायक-मुखानपि ।
स्थापयेदुक्त-मार्ग्गेण तत्तन्मन्त्रैः स्मरन् हरिम् ॥ 122 ॥

गोळका-द्वितयं विष्णोस्त्रितयं वा प्र-कीर्तितम् ।
अन्य-देव-प्रतिष्ठानु तदन्तश्चिन्तयेद्धरिम् ॥ 123 ॥

विष्णु-स्मृति-विहीना तु पूजा स्यादासुरी सदा ।
गृह्णन्ति देवता नैतां ततः स्याद् देश-विप्लवः ।
व्याधि-चोरादिभिस्तस्मादन्तर्घ्येयो हरिः सदा ॥ 124 ॥

विष्णु-भक्ति-विहीनस्य गतिः स्यान्न शुभा क्वचित् ।
भक्तस्याप्यन्न-देवेषु तस्माद् ध्येयो हरिः सदा ॥ 125 ॥

सं-स्मृतो भगवान् विष्णुः सर्व-मङ्गल-मङ्गलः ।
समस्ताभीष्ट-दायी स्यात् तेन ध्येयोऽखिलैर्जनैः ॥ 126 ॥

पुरुषोऽव्यक्तं च महानहङ्कारो मनस्तथा ।
दशेन्द्रियाणि शब्दाद्या भूतेताः पञ्च-विंशतिः ॥ 127 ॥

तत्वाख्याः काल-माये च नि-यतिर्म्मतिरेव च ।
विद्या कला प्र-वृत्तिश्च द्वा-त्रिंशतत्त्व-सङ्-ग्रहः ॥ 128 ॥

स्फूर्तिः संवित् प्रतिष्ठा च शक्तिरित्यपराणि च ।
महा-लक्ष्मी-स्वरूपाणि ह्येकादश विदो विदुः ।
विष्णोरपि हि रूपाणि तन्नाम्नैकादशैव तु ॥ 129 ॥

प्रधानोपम-वर्ण्णानि द्विभुजान्यप्यशेषतः ।
कृताञ्जलि-पुटान्येव प्रधानं तं हरिं प्रति ॥ 130 ॥

सर्वाण्येतानि तत्वानि ब्रह्मा तु पुरुषः स्मृतः ।
महांश्चाव्यक्त-नाम्नी तु ब्रह्माणि सं-प्र-कीर्तिता ।
एवं वायुरपि ज्ञेयो भारती चापि तत्-त्रयम् ॥ 131 ॥

रुद्रोऽहङ्-कार उद्दिष्टः स्कन्देन्द्रौ मन उच्यते ।
अहङ्-कारः शेष-वीन्द्रावपि विद्वद्भिरीरितौ ॥ 132 ॥

दिग्-वायु-सूनु-सूर्याश्च वरुणश्चाश्विनावपि ।
वह्नि-दक्षाविन्द्र-सूनु-र्मित्रश्चैव मनुस्तथा ॥ 133 ॥

इन्द्रियाख्याः शब्द-नामा बृहस्पतिरुदा-हृतः ।
अन्ये तु नूनवो वायो रुद्रस्यापि प्र-कीर्तिताः ॥ 134 ॥

एतेषु भगवान् विष्णुः प्रधान-तनुरेव तु ।
ध्येयः परात्मनोर्मध्ये तत्व-नाम तदर्थयोः ।
जपे न्यासे नमोऽन्तस्तु स्वाहान्तो होम-कर्म्मणि ॥ 135 ॥

त्रि-चतुः षड्-दशावृत्तिरेतेषां तु हुतादिके ।
न्यासोऽङ्गुलीषूरु-बाहु-मध्येषु व्युत्-क्रमे स्मृतः ।
क्रमे विपर्य्ययेणात्र शक्त्यादि-त्वं प्र-कीर्त्तितम् ॥ 136 ॥

ऋषि-च्छन्दो-देवताङ्ग-ध्यानानुक्तौ प्रधान-वत् ।
ज्ञेया मन्त्रा समस्तास्ते पृथङ् मोक्षादि-दायकाः ॥ 137 ॥

तन्त्र-मार्ग्गास्तु हरिणा ह्यसङ्ख्याः कीर्त्तिता अपि ।
तेष्वयं सु-गमो मार्ग्गः सु-फलश्चानु-तिष्ठताम् ॥ 138 ॥

यावतो ह्यननु-ष्ठाने कर्म्म-पूर्तिर्न्न विद्यते ।
तावत् समस्तं कथितमस्मिंस्तन्त्रे यता-विधि ॥ 139 ॥

प्रीयतेऽनेन मार्ग्गेण पूजितो मुक्ति-दो भवेत् ।

काम-दश्च स्व-भक्तानां भगवान् पुरुषोत्तमः ॥ 140 ॥

इति श्रीमदानन्द-तीर्थ-भगवत्पाद-विरचिते श्रीमत्-तन्त्र-सार-सङ्ग्रहे तृतीयोऽध्यायः

## चतुर्थोऽध्यायः

अथ विष्णोदिते तन्त्र-सारे मन्त्र-गणो हि यः ।

उदितः सङ्ग्रहेणासावुच्यतेऽखिल-साधकः ॥ 01 ॥

याष्टमस्तूयुतोऽन्तेन समेतश्चैव भू-भृतः ।

बीजं नमश्च भगवानुद्देश्यो रूप-संयुतः ॥ 02 ॥

स एव तादृशो लोक-त्रय-पालो भुवः-पतेः ।

भावं मे देहि दान्ते तु दापय स्वाहया युतः ॥ 03 ॥

मनुस्तस्यापरो नाम-बीजोद्देश-नमो-युतः ।

नमः सोद्देश-भगवान् महाशब्द-युतश्च सः ।

तादृशः स्वाहया युक्तो वराहस्यापरो मनुः ॥ 04 ॥

श्यामः सुदर्शन-धराभय-सद्-वरेतो

भूम्या युतोऽखिल-निजोक्त-परिग्रहैश्च।

ध्येयो निजैश्च तनुभिः सकलैरुपेतः

कोलो हरिः सकल-वाञ्छित-सिद्धयेऽजः ॥ 05 ॥

वैष्णवानां मुनिर्ब्रह्मा मन्त्राणां वर्ण्ण-भेदतः ।
ज्ञेयं छन्दो देवतैकस्तत्तद्रूपो हरिः परः ॥ 06 ॥

प्रणवेन स्व-नाम्ना च भू-धरेण परात्मना ।
सर्वज्ञ-सर्व-शक्तिभ्यां षडङ्गानि विदो विदुः ॥ 07 ॥

ज्ञानैश्वर्य्य-प्रभानन्द-तेजः शक्तिभिरेव वा ।
पूर्ण्णात्म मद्ध्य-गैः सर्व-वैष्णवाङ्गान्यथो विदुः ॥ 08 ॥

तिष्ठोदादिः स्व-जायायाः कारणं स्वाहया युतः ।
श्री-करोऽष्याण्र्णको मन्त्रो गरुडारूढ-संस्मृतिः ॥ 09 ॥

द्वीभीर्षय त्रासय च प्र-मर्द्दय तथैव च ।
प्र-ध्वंसयाथो रक्षेति पञ्चाङ्गाश्चेदुदा-हृतः ॥ 10 ॥

क्रूरं वीरं बृहद्विष्णुं दीप्यन्तं विश्वतो-मुखम् ।
पुं-मृगेन्द्रं भय-करं शुभं मृत्योश्च मारकम् ।
नमामि स्वयमित्येष द्वात्रिंशाण्र्णो मनुर्हरे ॥ 11 ॥

द्विर्ज्जयोस्योपरि निजं सोद्देशं सर्व-वित् तथा ।
महा-तेजो बलं वीर्यं तादृशं स्वाहया युतम् ।
चतुर्विंशाक्षरो मन्त्रो निखिलेष्ट-प्र-दायकः ॥ 12 ॥

विद्महे-धीमहे-पूर्वं स्वयं चैव महा-बलः ।
प्रेरयेत्-तन्न इत्येतन्मध्येऽनन्तः प्र-कीर्त्तितः ॥ 13 ॥

पादैर्व्यस्तैः समस्तैश्च पदैश्चाङ्गं प्रकीर्त्तितम् ।
पूर्वयोस्तत्र पूर्वं तु सर्व-ज्ञेन षडङ्गकम् ।
तृतीयं तु द्विरावृत्तैः पदैरङ्-समन्वितम् ॥ 14 ॥

ध्यायेन्नृ-सिंहमुरु-वृत्त-रवि-त्रि-नेत्रम् जानु-प्रसक्त-कर-युग्ममथापराभ्याम् ।
चक्रं दरं च दधतं प्रियया समेतं तिग्मांशु-कोट्यधिक-तेजसमग्र्य-शक्तिम्॥ 15

सर्वेष्वपि हि मन्त्रेषु ध्याद्यनन्तान्त-बाहुकः ।
चेतनान्तस्थमारभ्य सर्व-गान्त-स्वरूपवान् ॥ 16 ॥

अनन्त-रूपो ध्येयोऽतः स्व-गुरूक्तानु-सारतः ।
यथा-योग्यं यथा-शक्ति तत्तदायुध-भूषणः ॥ 17 ॥

चक्र-शङ्ख-गदा-पद्म-खड्ग-खेटाः स-शार्ङ्गकाः ।
शरो मुसल-वज्रौ च हलः पाशाङ्कुशौ तथा ॥ 18 ॥

शूलं च भिण्डि-पालश्च पट्टसोऽग्निर्वराभये ।
तत्व-मुद्राऽक्षमाला च पुस्तकं च विदारणम् ।
इत्यादीन्यखिलान्येव विष्णोश्चिन्त्यानि बाहुषु ॥ 19 ॥

वियत् स इति युग्माण्र्णौ विपरीतश्च स स्मृतः ।

स सर्ग्गहीनो वेतश्च बिन्दु-हीनेत्तरस्तथाऽऽ ॥ 20 ॥

त्रय एते महामन्त्राः पुरुषार्त्थ-चतुष्टये ।

कल्प-वृक्षाः प्रिया विष्णोर्व्विशेषाज्-ज्ञान-दायकाः ॥ 21 ॥

एतैरेव द्विरावृत्तैरङ्गमेषां प्र-कीर्त्तितम् ।

श्वास-रूपू जपो नित्यमुभयोर्व्विद्वदज्ञयोः ॥ 22 ॥

एक-विंशत्सहस्रात्मा स-षट्-छतमहर्न्निशम् ।

अर्प्पणीयो हरौ नित्यं प्रातर्य्योगो महानयम् ॥ 23 ॥

अशेष-दोष-दहनस्तत्व-ज्ञान-प्र-दायकः ।

अष्टैश्वर्य्य-प्रदश्चैव कृतादौ समुपासताम् ।

तार-योगोऽप्यवमेव ब्रह्मादावेव वर्त्तते ॥ 24 ॥

ध्यायेद् रवीन्दु-करमिन्दु-सहस्र-लक्ष-कान्तिं प्रिया-सहितमा-स्थितमिन्दु-बिम्बे।

शङ्खारि-दोर्द्वयमुदर्क-महेन्दु-बिम्बात् ।

सं-सिच्यमानममृतेन रमाधि-नाथम् ॥ 25 ॥

अन्तस्य रक्तवर्ण्णो वा ध्येयो विष्णुः सनातनः

विद्युद् वर्ण्णोऽथवा ज्ञेयः शक्त्येतः पञ्च-मन्त्र-युक् ॥ 26 ॥

अष्टाक्षरो महामन्त्रस्तैरेवाङ्गैः समन्वितः ।
अन्त्यध्यानयुतश्चैव निःशेष-पुरुशार्थ्-दः ॥ 27 ॥

मूलं न प्रतिषेधश्च सोद्धेशो भगवानपि ।
विष्णुर्भोज्याधिपः स्वाहायुक्तोऽष्टादशवर्णकः ॥ 28 ॥

अङ्गानि तत्-पदैरेव मन्त्रचिन्तामणिस्त्वयम् ।
यथेष्ट-भक्ष्य-भोज्यादि-दाता मुक्ति-प्रदायकः ॥ 29 ॥

ध्यायेत् सु-शुक्लमरविन्द-दलायताक्षं
सौवर्ण्-पात्र-दधि-भोज्यमथामृतं च ।
दोर्भ्यां तथानमखिलैश्च सुरैः परीतं ।
शीतांशु-मण्डल-गतं रमया समेतम् ॥ 30 ॥

अमृतः स्वयमुद्देश-युतः स-हृदयो मनुः ।
स-तारोऽष्टाक्षरोऽङ्गानि पदैर्व्यस्त-समस्तकैः ॥ 31 ॥

उद्यद्रवि-प्रभमरीन्द्र-दरौ गदां च ज्ञानं च बिभ्रतमजं प्रियया समेतम् ।
विश्वावकाशमभितः प्रति-पूरयन्तं भासा स्वया स्मरत विष्णुमजादि-वन्द्यम् ॥

त्रि-विक्रमस्तु सोद्देशो विश्व-रूपश्च तत्पुरः ।
धी-विधौ च महे विष्णुस्तन्नः-प्रेरण-मद्ध्य-गः ॥ 33 ॥

स्वयमुद्देश-संयुक्तस्तदाद्यर्णं-पुरस्सरः ।

स-नतिः षडक्षरो मन्त्रो वर्णैरङ्गक्रिया मता ॥ 34 ॥

अङ्गार-वर्णमभितोऽण्ड-बहिः प्रभाभि-र्व्याप्तं परश्वध-धनुर्धरमेक-वीरम् ।

ध्यायेदजेश-पुरुहूत-मुखैः-स्तुवद्भि रावीतमात्म-पदवीं प्रति-पादयन्तम्॥ 35 ॥

श्यामं रवीन्द्वमित-दीधिति-कान्ति-युक्तं

ज्ञानं शरं दधतं प्रियया समेतम् ।

स्वात्म-स्वरूपममितं हनु-मन्मुखेषु

सन्-दर्शयन्तमजितं स्मरतोरु-गीर्भिः ॥ 36 ॥

निज-गोत्रं तु सोद्देशं पूर्वाक्षर-पुरस्सरम् ।

नत्यन्तं तार-पूर्वं च मनुरष्टाक्षरो मतः ॥ 37 ॥

ते च बीजे बीज-भूते धर्मादीनामशेषतः ।

एते विजय-दा मन्त्रा ज्ञान-मोक्ष-प्रदायकाः ।

हिरण्य-रत्न-राज्यादि-समभीष्ट-सुर-द्रुमाः ॥ 38 ॥

कृष्णो गो-विच्च कामेतौ सोद्देशो वल्लवी-जनः ।

प्रियश्च तादृशः स्वाहा-युगष्टादश-वर्णकः ।

पदैरङ्गानि सं-प्रीति-काम-मोक्ष-प्रदो मनुः ॥ 39 ॥

ध्यायद्धरिन्मणि-निभं जगदेक-वन्द्यं

सौन्दर्य-सारमरि-शङ्ख-वराभयानि ।

दोर्भिर्दधानमजितं स-रसं च भैष्मी-

सत्या-समेतमखिल-प्रदमिन्दिरेशम् ॥ 40 ॥

स-कामः स्वयमुद्देशी नत्यन्तोऽयं षडक्षरः ।

तदादिरपि सर्वेष्ट-चिन्तामणिरुदीरितः ॥ 41 ॥

दृष्टार्थ एव मन्त्राणां कलौ वीर्य्यं तिरस्कृतम् ।

तत्राप्प्युद्दीप्त-वीर्य्या हि मन्त्रा अत्र प्र-कीर्तिताः ।

वासिष्ट-वृष्णि-प्रवर-मन्त्रास्तत्रापि वीर्य्य-दाः ॥ 42 ॥

स्वयं वेद-पदारूढः पूर्व-वर्ण्ण-पुरस्सरः ।

नत्यन्तोऽष्टाक्षरो मन्त्रः प्रियो विज्ञान-गोपतेः ॥ 43 ॥

व्याख्या-श्री-सर्व-विज्ञान-कवितादि-गुण-प्रदः ।

वादे विजय-दो नित्यं यथा युद्धे नृ-केसरी ॥ 44 ॥

विज्ञान-रोचिः-प्रति-पूरितान्तर्बाह्याण्ड-कोशं हरितोपलाभम् ।

तर्क्काभयेतं विधि-शर्व-पूर्व-गीर्वाण-विज्ञान-दमानतोऽस्मि॥45 ॥

ज्ञानानन्द-पुरः पूर्ण्णो विद्महे धीमहे तथा ।

तन्नः-प्रेरण-मध्ये तु व्यासो मन्त्राधिपाधिपः ॥ 46 ॥

आदि-बीजं स्थिरादोष-ज्ञान-बीजं वि-मुक्तिदम् ।

सर्व-पापक्षय-करं सर्व-व्याधि-वि-नाशनम् ॥ 47 ॥

ध्यायेच्छशाङ्क-शत-कोट्यति-सौख्य-कान्तिं

सं-सिच्यमानममृतोरु-घटैः सुरेशैः ।

वर्णाभि-मानिभिरजेश-मुखैः सहैव

पञ्चाशता प्रति-गिरन्तमशेष-विद्याः ॥ 48 ॥

सोद्देशस्तु स्वयं दीर्घ-पूर्वार्णाद्यो नमो-युतः ।

सर्व-विद्या-प्रदोऽष्टार्णः प्रति-वादि-जय-प्रदः ।

वि-मुक्ति-साधनः कीर्त्ति-बुद्धि-स्थैर्य-प्रदः सदा ॥ 49 ॥

वन्दे तुरङ्ग-वदनं शशि-बिम्ब-संस्थं चन्द्रावदातममृतात्मकरैः समन्तात् ।

अण्डान्तरं बहिरपि प्रति-भासयन्तं शङ्खाक्ष-पुस्तक-सु-बोध-युताब्ज-बाहुम् ॥

नस्तो  मुखादपि निरन्तरमुद्गिरन्तं

विद्या अशेषत उताब्ज-भवेश-मुख्यैः ।

सं-सेव्यमानमति-भक्ति-भरावनम्रै-

लक्ष्मीऽमृतेन सततं परि-षिच्यमानम् ॥ 51 ॥

स्वयमुद्देशवान् पूर्व-वर्ण-पूर्वो नमो-युतः ।

स-तारोऽष्टाक्षरश्चैव नवार्णश्च मनू स्मृतौ ॥ 52 ॥

प्रोद्यद्दिवाकर-समान-तनुं सहस्र-

सूर्योरु-दीधितिभिराप्त-समस्त-लोकम् ।

ज्ञानाभयाङ्कित-करं कपिलं च

दत्तं ध्यायेदजादि-समितिं प्रति बोधयन्तम् ॥ 53 ॥

अधृष्य-ता-ज्ञान-मोक्ष-प्रदौ भक्तेष्विमौ सदा ।

सूक्तं दीर्घ-तमो-दृष्टं विष्णोर्नुकमिति प्रभोः ॥ 54 ॥

सर्वार्थ-दं गार्त्समदं यो जात इति चापरम् ।

वासिष्ठं च परो मात्रयेति ज्ञान-विमुक्ति-दम् ॥ 55 ॥

भौवनीयं सर्व-काम-मोक्ष-दं य इमेत्यपि ।

एवमेवाखिला वेदा ज्ञातव्या विष्णु-तत्पराः ॥ 56 ॥

स्व-दृष्टं सूक्तमखिल-काम-दं हरि-तुष्टि-दम् ।

वाचोऽम्भ्रिण्याः श्रियोऽङ्गानि श्रीर्लक्ष्मीर्मन्दिरा रमा ॥ 57 ॥

कौशेय-पीत-वसनामरविन्द-नेत्रां

पद्म-द्वयाभय-वरोद्यत-पद्म-हस्ताम् ।

उद्यच्छतार्क-सदृशां परमाङ्क-संस्थां

ध्यायेद् विधीश-नत-पाद-युगां जनित्रीम् ॥ 58 ॥

लज्जा-बीजं च तद्-बीजं तस्या एवाभि-धायकम् ।

पाशाङ्कुशौ रक्त-वस्त्रं लज्जा-बीजे विशिष्यते ॥ 59 ॥

अ-मध्य-युग्म-स्वर-ग-तेनैवाङ्गमुदाहृतम् ।
सत्ता-बीजं च दुर्बीजं तद्वदेव प्र-कीर्त्तितम् ॥ 60 ॥

वर्णः श्यामो विशेषोऽत्र ताम्बूलम् नीलमुत्पलम् ।
चक्र-शङ्खौ तर्ज्जनं च शूलमित्यपरत्र च ॥ 61 ॥

नमोऽन्तः स्वेन सहितस्तदेवान्यो मनुः स्मृतः ।
दुर्ग्गा-त्रिष्टुप् कश्यपोक्ता तत्र वर्ण्णोऽग्निवत् स्मृतः ॥ 62 ॥

त्रि-नेत्रत्वं च दुर्ग्गायाः प्रायः सर्वत्र कथ्यते ।
पादैः समस्तेन तथा षडर्ण्णेनाङ्गमुच्यते ॥ 63 ॥

रमया एव रूपाणि त्वेतानि हि विदो विदुः ।
मुख्यतो जामदग्न्यस्तु देवताऽस्य मनोः स्मृतः ॥ 64 ॥

हिरण्य-गर्भ-सूक्तं च भृगु-दृष्टं प्र-कीर्त्तितम् ।
ब्रह्म-धातृ-विरिञ्चाज-पाद्मैरङ्गमुदाहृतम् ॥ 65 ॥

ध्यायेन्निषण्णमजमच्युत-नाभि-पद्मे
प्रोद्यद्दिवा-कर-समुह-निकाशमग्र्यम् ।
मातृ-प्रकार-करमुत्तम-कान्ति-मद्धि-

वंक्रैः सृजन्तमखिलैः परमात्थ-विद्याम् ॥ 66 ॥

स्वयमुद्देश-नतिमांस्तस्य पञ्चाक्षरो मनुः ।

स्वयमेवापरोऽष्टाण्णस्तादृशः सं-प्रकीर्त्तितः ॥ 67 ॥

बळाद्यं भृगुणा दृष्टं प्राणाग्नेः सूक्तमुच्यते ।

प्राणाद्यैः पञ्चभिस्तस्याप्यङ्गान्युक्तानि सूरिभिः ॥ 68 ॥

उद्यद्रवि-प्रकर-सन्निभमच्युताङ्के

स्वासीनमस्य नुति-नित्य-वचः-वृत्तिम् ।

ध्यायेद् गदाभय-करं सु-कृताञ्जलिं तं

प्राणं यथेष्ट-तनुमुन्नत-कर्म्म-शक्तिम् ॥ 69 ॥

प्राणाद्याः पञ्च मन्त्राश्च तस्य देवस्य वाचकाः ।

उच्यते हरिरप्येतैः साक्षान्नारायणादिकः ॥ 70 ॥

ब्रह्माण्या अपि भारत्या गौरिर्य्यस्त इति श्रुतौ ।

मन्त्रौ दीर्घ-तमो-दृष्टौ सर्वाभीष्ट-प्र-दायकौ ॥ 71 ॥

उद्यद्दिवा-कर-समूह-निभां स्वभर्त्तु-

रङ्क-स्थितामभय-सद्वर-बाहु-युग्माम् ।

मुद्रां च तत्व-दृशये वर-पुस्तकं च ।

दोर्य्युग्मकेन दधतीं स्मरताऽत्म-विद्याम् ॥ 72 ॥

पादैर्व्यस्तैः समस्तैश्च तदङ्गानि विदो विदुः ।
स्वयमुद्देश-नत्यन्तौ मन्त्रौ द्वावपरौ तयोः ॥ 73 ॥

मन्त्रा एते हरेः प्रीति-दायकाः सर्व-काम-दाः ।
इष्टं दैवं हरिः सक्षाल्लक्ष्मीर्भाग्यस्य देवता ।
गुरुर्ब्रह्माऽथ वायुर्वा विद्या देव्यौ प्रकीर्त्तिते ॥ 74 ॥

तस्मादेते प्रिया विष्णोरन्तरङ्ग-तया सदा ।
ज्ञेयाश्चैव प्र-पूज्याश्च विष्णोः प्रीतिमभीप्सता ॥ 75 ॥

उद्देश-नति-युङ्मन्त्रः स्वयमेव शिवस्य तु ।
वर्णैरेतैस्तदङ्गानि वाम-देवो मुनिः स्मृतः ॥ 76 ॥

पङ्क्ति-शब्दात्र्थ-विज्ञाने नहि च्छन्दसि संशयः ।
ध्येयः पञ्च-मुखो रुद्रः स्फटिकामल-कान्ति-मान् ॥ 77 ॥

विद्युच्छुभ्रासित-रजः-श्यामान्यस्य मुखानि तु ।
जटाव-बद्धेन्दु-कलः प्रिया-युङ् नाग-भूषणः ॥ 78 ॥

मन्त्रेष्वेतेषु सर्वेषु वाच्यस्तारेण केशवः ।
अन्तर्य्यामि-तया ध्येयः सर्व-देवेषु सर्वदा ॥ 79 ॥

स एव वनिता-लिङ्गः पार्वत्या मनुरुच्यते ।

गौरी वराभय-करा ध्येया पीताम्बरा च सा ॥ 80 ॥

स्वयमुद्देश-नत्यन्तः पूर्व-पूर्वः षडक्षरः ।
सनत्कुमार-दृष्टोऽयं मनुः शेषस्य काम-दः ॥ 81 ॥

दधानो हल-सौनन्दौ श्वेत-वर्ण्णः कृताञ्जलिः ।
सहस्त्र-मूर्द्धाऽद्वितीय-कर्ण्ण-भूष प्रियायुतः ।
वन-माली नील-वासा ध्येयो विष्णोस्तु पृष्ठतः ॥ 82 ॥

व्यत्यस्त-पक्षि-तारौ च स्वाहान्तो गारुडो मनुः ।
काश्यपोऽस्य मुनिर्ध्येयः सुधा-पूर्ण्णं हिरण्मयम् ॥ 83 ॥

दधानः कुम्भमभयं पीत-शुक्लारुणो हरिः ।
कृष्णाश्चाऽ जानुतो नाभेः कण्ठात् कादन्त एव च ॥ 84 ॥

प्रिया-युक् पुरतो विष्णोः पक्ष-तुण्ड-समन्वितः ।
जङ्गम-स्थावर-विष-हृदयं सर्व-कामदः ॥ 85 ॥

मन्त्राश्च लोक-पालानां नमोऽन्ताः सर्व-काम-दाः ।
नील-रक्तासित-श्वेत-रक्त-शुक्लाश्च वर्ण्णतः ॥ 86 ॥

स-प्रियाः साभया वज्र-शक्ति-दण्डासि-पाशिनः ।
गदा-कुमुद-शूलेष्ट-खड्गिनो भूषणोज्ज्वलाः ॥ 87 ॥

अग्निश्च स्वयमुद्देशी सनमः स्कन्द-वाचकः ।

कौशिकोऽस्य मुनिर्वह्नि-वर्ण्णः षण्मुख उज्ज्वलः ।

धनुः-शक्ति-धरो ध्येयः कामदो भयनाशनः ॥ 88 ॥

ह्रस्वः कृपाळु सेतश्च स्वयमन्यः स्वयं तथा ।

स-तारोऽष्टाक्षरः सौरः क्रमव्युत् क्रमतः पदैः ॥ 89 ॥

आङ्गानि पद्म-युगळ-धरो ध्येयोऽरुणो रविः ।

सर्व-व्याधि-हरः श्री-दो वृष्टि-दोऽयं मनुः स्मृतः ॥ 90 ॥

मोनयदासप्रप्रक्षि व्यत्यस्तो विघ्न-राण्मनुः ।

रक्ताम्बरो रक्त-तनू रक्तमाल्यानु-लेपनः ॥ 91 ॥

लम्बोदरो गज-मुखः पाश-दन्ताङ्कुशाभये ।

बिभ्रद् ध्येयो विघ्न-हरः काम-दस्त्वरया ह्ययम् ॥ 92 ॥

तत्र-तत्र स्थितो विष्णुस्तत्तच्छक्तीः प्र-बोधयन् ।

एक एव महा-शक्तिः कुरुते सर्वमञ्जसा ॥ 93 ॥

स्वयमुद्देशवान् पूर्व-वर्ण्ण-पूर्वो नमो-युतः ।

धान्वन्तरो महा-मन्त्रः संसृति-व्याधि-नाशनः ॥ 94 ॥

चन्द्रौघ-कान्तिममृतोरु-करैर्जगन्ति ।

सञ्-जीवयन्तममितात्म-सुखं परेशम् ।

ज्ञानं सुधा-कलशमेव च सन्-दधानं

शीतांशु-मण्डल-गतं स्मरताऽत्म-संस्थम् ॥ 95 ॥

मूर्द्धिनः स्थितादमुत एव सुधां स्रवन्तीं

भ्रू-मध्य-गाच्च तत एव च तालु-संस्थात् ।

हार्द्दाच्च नाभि-सदनादधर-स्थिताच्च

ध्यात्वाऽभि-पूरित-तनुर्द्दुरितं नि-हन्यात् ॥ 96 ॥

अज्ञान-दुःख-भय-रोग-महा-विषाणियोगोऽयमाशु विनि-हन्ति सुखं च दद्यात्

उन्माद-विभ्रम-हरः परतश्च सान्द्र-मानन्दमेव पदमापयति स्म नित्यम्॥97॥

ध्यात्वैव हस्त-तळ-गं स्वमृतं स्रवन्तं

देवं स यस्य शिरसि स्व-करं निधाय ।

आवर्त्तयेन्मनुमिमं स च वीत-रोगः

पापादपैति मनसा यदि भक्ति-नम्रः ॥ 98 ॥

शतं सहस्रमयुतं लक्षं वाऽऽ रोगसङ्-क्षयात् ।

इममेव जपेन्मन्त्रं साधूनां दुःख-शान्तये ॥ 99 ॥

ज्वर-दाहादि-शान्त्यर्थं तर्पयेन्मनुनाऽमुना ।

ध्यात्वा हरिं जले सप्त-रात्राच्चूर्त्तिर्विनश्यति ॥ 100 ॥

अयुतामृत-समिद्धूमाद् गो-घृत-क्षीर-संयुतात् ।
सर्व-रोगा वि-नश्यन्ति वि-मुखो न हरेर्य्यदि ॥ 101 ॥

भूताभिचार-शान्त्यर्थमपामार्ग्गाहुति-क्रिया ।
द्विगुणाऽमृतया पश्चात् केवलेन घृतेन वा ॥ 102 ॥

आयुर्विवृद्धये नित्यं जन्म-नक्षत्र एव वा ।
चतुश्चतुर्भिर्द्धूर्वाभिः क्षीराज्याक्ताभिरिष्यते ॥ 103 ॥

सर्व-क्रिया हरौ भक्ते हरि-भक्तैः स्वनुष्ठिताः ।
गुरु-भक्तैः सदाचारैः फलन्त्यद्धा नचान्यथा ॥ 104 ॥

ब्रह्मान्ता गुरवश्चैव सम्प्रदाय-प्रवर्तकाः ।
तत्तद्-गुणानु-सारेण पूज्या ध्येयाश्च कृत्स्नशः ॥ 105 ॥

सर्वेभ्योऽभ्यधिका भक्तिर्विष्णौ स्यादति-निश्चला ।
लक्ष्मी-ब्रह्मादिषु ततः क्रमेण स्यात् सु-भाविता ।
एवं विद्याः फलिष्यन्ति नान्यथा तु कथञ्चन ॥ 106 ॥

शुभान् ध्यायन्ति ये कामान् गुरु-देव-प्रसाद-जान् ।
इतरानात्म-पापोत्थांस्तेषां विद्या फलिष्यति ॥ 107 ॥

मुक्तावपि च संसारे नाऽत्मनो विष्णुतां क्वचित् ।

ब्रह्म-रुद्रादि-भावं वा साम्यं वाऽधिक्यमेव वा ॥ 108 ॥

अ-तद्वशत्वमथवा यः स्मरेत् स तु सिद्धि-भाक् ।

नान्यथा सिद्धिमाप्नोति कल्प-कोटि-शतैरपि ॥ 109 ॥

स्मृत्वा गुरुं पूर्व-गुरुमादि-मूल-गुरो तथा ।

देवतां वासु-देवं च विद्याभ्यासी तु सिद्धि-भाक् ॥ 110 ॥

अव-ज्ञात गुरूणां च देवतानां न सिध्यति ।

प्र-याति च तमो घोरं मन्त्रावज्ञा-कृदेव च ॥ 111 ॥

यस्तारतम्य-वेत्ता स्याद् गुरूणां देवतास्वपि ।

भक्तिमान् गुरु-देवेषु तद्भक्तेषु च सिद्ध्यति ॥ 112 ॥

गुरु-देव-प्रतीपानां विमुखस्तत्-प्रिये रतः ।

अ-काम-क्रोध-लोभश्च न-चिरात् सिद्धिमाप्नुयात् ॥ 113 ॥

सकामेभ्योऽमित-गुणा याऽकामैस्तु कृता क्रिया ।

तस्मादकाम एवालं भजेद् विष्णुं सनातनम् ॥ 114 ॥

अयं मे हस्त इति च मन्त्रः पूर्वोक्त-वत् स्मृतः ।

अत्रोक्तास्तु क्रियाः पूर्व-मन्त्रेष्वप्युप-लक्षणम् ॥ 115 ॥

विजय-स्तम्भनादीनि नार-सिंहैर्विशेषतः ।

जामदग्न्यैष्च कार्य्याणि राघवैर्य्यादवैरपि ।
वाराहैः स्तम्भनं क्षिप्रं श्री-कराः कथिताः पुरा ॥ 116 ॥

बहु-बाहुं महा-कायमुद्युक्तं चोद्यतायुधम् ।
स्मरन् विजयमाप्नोति स्तम्भनादींश्च कारयेत् ॥ 117 ॥

वसु-पूर्ण्ण-करं रत्न-पर्वत-स्थं वि-भावयन् ।
वसु-सिद्धिमवाप्नोति सेव्यमानमजादिभिः ।
श्रीया विभूतिभिर्य्युक्तं भावयन् भूतिमाप्नुयात् ॥ 118 ॥

यद्यन्मनो-गतं तस्य तत्तदाप्नोत्यसंशयम् ।
तथा-तथा हरिं ध्यायन् क्रियास्तास्ताश्च साधयन् ॥ 119 ॥

श्रीये पद्मानि जुहुयात् सम्-प्रीत्या उत्पलानि च ।
शरान् जयाय जुहुयादभि-मन्त्र्य प्र-योजयेत् ॥ 120 ॥

विद्यायै मन्त्रितं वारि वाचां वा तुळसीमपि ।
ब्राह्मीं घृष्टं सुवर्ण्णं वा शतावृत्त्या तु नित्यशः ॥ 121 ॥

आ-कुर्वंश्च क्रिया भक्त्या निरपेक्षो भजन् हरिम् ।
सर्वमेतदवाप्नोति विशेषण न संशयः ॥ 122 ॥

सृष्टि-स्थिति-लय-न्यासाः प्रति-लोमानु-लोमतः ।

स्थित्यन्ता एव वर्णानां श्रेष्ठा एव चतुर्दश ।
संहृत्यन्ता मोक्षिणां तु एक-विंशतिरेव वा ॥ 123 ॥

पाद-हृत्केषु नाभ्यास्ययुतं च स-ललाटकम् ।
स-नासिका-दृग्जान्वोश्च स-श्रोत्रं सोरुकं तथा ॥ 124 ॥

सोरस्कं च स-कण्ठं च स-भुज-द्वयमेव च ।
स-गण्ड-युग्मं साळीकं स-तुन्दं क्रोडकं तथा ॥ 125 ॥

स-तळं च स-गुह्यं च स-पार्श्व-द्वयमेव च ।
सदोर्द्वयं व्यापकं च गळ-पार्श्व-द्वयेन च ॥ 126 ॥

ककुदा स्तन-द्वयेनापि पृष्ठ-मूलेन सर्वशः ।
न्यासो यथा-क्रमं प्रूक्तो मन्त्रेष्वेतेषु कृत्स्नशः ।
प्रतिमायामात्मनि च न्यासोऽयं सन्निधान-कृत् ॥ 127 ॥

बीजान्तः-साध्य-मद्ध्यं च विभक्त-दळ-मन्त्र-युक् ।
वर्णानु-प्रति-लोमेतं वृत्तं भू-पुर-सं-युतम् ।
बीज-सन्दब्ध-कोणं च यन्त्रं रक्षादि-साधकम् ॥ 128 ॥

समं तत् सर्व-मन्त्रेषु जप्तं धार्य्यं तु वा भुवि ।
विलिख्य मण्डले वा तत् पूजयेद्धरिमञ्जसा ॥ 129 ॥

प्रतिमोक्त-लक्षणैर्य्यावद् युक्त आचार्य्य उत्तमः ।
सर्व-वित् तपसा युक्त आज्ञा-शक्ति-युतो हरेः ॥ 130 ॥

यावद्-भक्तो यथालब्धैर्ग्गुणैर्युक्तो हि वैष्णवः ।
गुरुः सत्सम्प्रदाय-ज्ञस्तारतम्येन सिद्धि-दः ॥ 131 ॥

उत्तमादुत्तमा सिद्धिर्द्धर्म्मु-मोक्षादिषु स्फुटा ।
तस्मादुत्तम आचार्य्यं लब्धे नातोऽवरं व्रजेत् ॥ 132 ॥

एकस्य शिष्यतां प्राप्य तदाज्ञां न विना समम् ।
अवरं वा व्रजेदुच्च-गुणश्चेन्नैव दुष्यति ॥ 133 ॥

विशेषतो गुणश्च स्याद् देवेष्वप्येवमेव हि ।
तस्मादुत्तममाचार्य्यं देवेशं चाऽश्रयेद्धरिम् ॥ 134 ॥

अपरोक्ष-दृशेरेव यस्मान्मोक्षो नचान्यथा ।
अपरोक्ष-दृशिश्चैव श्रवणान्मननादनु ।
सम्यङ्-निश्चित-तत्वस्य नि-दिध्यासनया भवेत् ॥ 135 ॥

द्विविधा सा च सं-प्रोक्ता विष्णु-शास्त्राव-मर्शनम् ।
एकं ध्यानं हरेरन्यच्चत्वार्यङ्गानि तत्र च ।
यमश्च नियमश्चाऽसा प्राणायाम इतीरितः ॥ 136 ॥

अहिंसा सत्यमस्तेयं ब्रह्म-चर्य्यापरि-ग्रहौ ।
यमाः शौचं तपस्तुष्टिः स्वाध्यायो हर-पूजनम् ।
नियमा वीर-पद्मे च स्वस्तिकाद्यानि चाऽसनम् ॥ 137 ॥

रेचकः पूरकश्चैव कुम्भकश्च त्रिधा स्मृतः ।
प्राणायामः स्मृतिं विष्णोर्विना नियम उच्यते ॥ 138 ॥

अधीतिः स्मृति-युक्ता तु निदिध्यासनमेव हि ।
प्राणायामेऽपि विष्णोर्य्यत् स्मरणं ध्यानमेव तत् ॥ 139 ॥

आसा शौचं प्राण-यामो विष्परि-ग्रह-पूर्वकाः ।
तप आद्याः क्रमात् सर्व उत्तरोत्तरोऽधिकाः ॥ 140 ॥

सर्वस्माच्छ्रवणाद्यास्तु मुख्या मुक्ति-प्रसाधने ।
अज्ञस्य श्रवणं श्रेष्ठमयुक्तेर्मननं तथा ।
ध्यानं निश्चित-तत्वस्य तस्माच्छास्त्राव-मर्शनम् ॥ 141 ॥

वरं दश-गुणं तस्माद् व्याख्यैकस्य शतोत्तरा ।
अपरोक्ष-दृशाऽप्येषा कर्त्तव्या विष्णु-तुष्टि-दा ॥ 142 ॥

य इमं परमं गुह्यं मद्भक्तेष्वभि-दास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ 143 ॥

नच तस्मान्मनुष्येषु कश्चिन्मे प्रिय-कृत्तमः ।

भविता नच मे तस्मादन्यः प्रिय-तरो भुवि ॥ 144 ॥

शौचासने त्वङ्ग-मात्रं न पृथग् धर्म्म-कारणम् ।

प्राणायामादयस्तुष्टि-पर्यन्ता द्वि-गुणाधिकाः ॥ 145 ॥

स्वाध्यायोऽतः कोटि-गुणस्ततोऽनन्त-गुणा हरेः ।

पूजाऽतस्त्रि-गुणं ध्यानमिति धर्म्म-क्रमः स्मृतः ॥ 146 ॥

ऊर्वोरधः पदोरूर्द्ध्वं विभागेनेति च त्रिधा ।

आसन-त्रयमुद्दिष्टं मन्त्र-स्मरण-पूर्वकम् ॥ 147 ॥

द्वि-गुणोत्तरं रेचकादि षोडशादि-क्रमेण तु ।

मात्राणां ह्रस्व-वर्ण्णस्य कालो मात्रेति शब्द्यते ॥ 148 ॥

क्रमेणैवाभ्यसेन्मात्रा-वृद्धिमेकाग्र-धीः पुनः ।

रेचयित्वा दक्षिणतः  पूरयित्वा तु वामतः ।

कुम्भकं च सुषुम्नायां विष्णुं वायुं च संस्मरेत् ॥ 149 ॥

मूलाधारं समारभ्य त्वा-मूर्द्धानमृजुस्थिता ।

मध्ये सुषुम्ना विज्ञेया वज्रिकाऽऽर्य्याऽव-भासिनी ।

वैद्युता ब्रह्म-नाडीति सैव पञ्च-प्र-भेदिनी ॥ 150 ॥

पृष्ठ-वामाग्र-दक्षान्तर्भेदास्ते च क्रमेण तु ।

हरिन्नीलः सितः पिङ्गो लोहितश्चात्र केशवः ।

प्रद्युम्नादि-स्वरूपेण ध्येयः सिद्धिमभीप्सता ॥ 151 ॥

मूले च नाभौ हृदयेन्द्र-योनि-भ्रू-मध्य-मूर्द्ध-द्वि-षडन्तकेषु ।

चतुः-षडष्ट-द्वि-चतुर्द्धि-षट् क-दलेषु पद्मेषु सितारुणेषु ।

पञ्चात्मकोऽसौ भगवान् सदैव ध्येयो हृदन्तान्यरुणानि तानि॥ 52 ॥

त्रि-कोण-वह्नौ च षडश्र-वायौ

द्विस्तावदत्र-रवि–वृत्त-शशि-स्थ-वह्नौ ।

वृत्ते विधावपि विचिन्त्यमिदं दशार्द्ध-

रूपं सितं तदखिलं हृदयात् पर-स्थम् ॥ 153 ॥

इडा च पिङ्गला चैव वज्रिका धारणी तथा ।

सुषुम्नायास्चतुर्दिक्षु वज्रिकाद्यासु तत्र च ।

चतुर्मूर्त्तिः स भगवान् हृदये सं-व्यवस्थितः ॥ 154 ॥

द्वासप्तति-सहस्राणि नाड्योऽन्यास्तु प्रधानतः ।

बृहती-सहस्र-स्पर्शानामृचां वाच्योऽत्र केशवः ॥ 155 ॥

रूपाणां लक्षणं तेषां रहस्यत्वान्न कथ्यते ।

विष्णुना ब्रह्मणे प्रोक्तं ग्रन्थ-सङ्कोचतस्तथा ॥ 156 ॥

खण्ड-स्मतिर्द्धारणा स्यादखण्डा ध्यानमुच्यते ।
अ-प्रयत्नात् समाधिश्च दर्शनं चिरया तया ॥ 157 ॥

अथवा सततं शास्त्र-विमर्शेन भविष्यति ।
परम-स्नेह-संयुक्त-यथार्त्थ-ज्ञानतो भवेत् ।
सा भक्तिरिति विज्ञेया साधनं भोग-मोक्षयोः ॥ 158 ॥

मुख्यमेषैव नान्यत् स्यात् सर्वं व्यर्त्थं तया विना ।
सैकऽप्यभीष्ट-फल-दा मोक्षो दर्शन-युक्तया ॥ 159 ॥

दर्शनं च तया हीनं व्यर्थमन्यत् किमुच्यते ।
योग्यं तु दर्शनं नैव तया हीनं भविष्यति ॥ 160 ॥

आनन्द-चित्सदिति-पूर्व-गुणैः समस्तै-
र्मत्त्यादिभिर्विधि-परैर्भगवान् क्रमेण ।
ध्यातोऽधिकैरधि-गुणोऽधिकमेव सौख्यं
मुक्तौ ददाति सततं परम-स्वरूपः ॥ 161 ॥

निर्दोषाखिल-सं-पूर्ण्ण-गुणेन हरिणा स्वयम् ।
ब्रह्मणे कथितात् तन्त्र-सारादुद्धृत्य सादरम् ।
आनन्द-तीर्त्थ-मुनिना कृतो ग्रन्थोऽयमञ्जसा ॥ 162 ॥

ग्रन्थोऽयं पाठ-मात्रेण सकलाभीष्ट-सिद्धि-दः ।
किमु ज्ञानादनु-ष्ठानादुभयस्मात् पुनः किमु ॥ 163 ॥

यस्य त्रीण्युदितानि वेद-वचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो राम-वचो-नयं प्रथमकं पृक्षो द्वितीयं वपु
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ 164 ॥

अशेष-दोषोज्झित-पूर्ण-सद्गुणं सदा विशेषाव-गतोरु-रूपम् ।
नमामि नारायणमप्रतीपं सदा प्रीयेभ्यः प्रियमादरेण ॥ 165 ॥

॥ इति श्रीमदानन्द-तीर्थ-भगवत्पाद-विरचिते श्रीमत्-तन्त्र-सार-सङ्ग्रहे चतुर्थोऽध्यायः ॥

॥ श्री कृष्णार्पणमस्तु ॥
॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥
॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डामण्डानम् ॥